# Shridhara Suprabhatam

# શ્રીધરસુપ્રભાતમ્

## Document Information

Text title : Shridhara Suprabhatam 1

File name : shrIdharasuprabhAtam1.itx

Category : deities_misc, gurudev, shrIdharasvAmI, suprabhAta

Location : doc_deities_misc

Author : Prithviraj Bhalerao (suvrata)

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

# શ્રીધરસુપ્રભાતમ્

શ્રીધરાય નમઃ ।

પ્રાચીદિશી પ્રગટતા શુભરમ્યશોભા
 ભૃઙ્ગઃસરાગવિહગાઃ વિહરન્ત્યરણ્યે ।
પ્રતિષ્ઠ ભો ! ગુરુવરં ત્વરિતં પ્રસીદ
 હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૧॥

વેધઃ પુરારિહરયઃ સકલા દિવૌકાઃ
 ધ્યાયન્તિ શાન્તમુનયસ્તુ પ્રણમ્ય તુભ્યમ્ ।
ગન્ધર્વકિન્નરગણા મુદિતા વદન્તિ
 હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૨॥

વીણાસુ વેણુકલનાદિતમાશ્રયોઽયં
 ગાયન્તિ ભક્તિરસતઃ સુજનાઃ સુતન્ત્ર્યા ।
અર્ઘ્યાણિ બ્રાહ્મણજનાઃ કિલ ચાર્પયન્તિ
 હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૩॥

ગોષ્ઠેષુ કિઙ્કિણિરવેષુ ગવાઃ સવત્સાઃ
 દુગ્ધં શ્રવન્તિ મૃદુકોમલભાવયુક્તાઃ ।
ગાયન્તિ સાન્દ્રમધુરં શુકકોકિલાર્વૈ
 હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૪॥

શ્રૌતઃ સ્વનાઃ હવનમણ્ડપનાદિતાસ્તે
 આલ્હાદયન્તિ સુજનાન્ ગુરુપાદનિષ્ઠાન્ ।
સૌરભ્યપૂર્ણપવનાઃ વિચરન્તિ ભૂમૌ
 હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૫॥

ગઙ્ગાજલત્રિદલચન્દનચન્દ્રગન્ધા
 પુન્નાગચમ્પકશમીતુલસીપ્રવાલાઃ ।
ભક્તાહિતાસ્તવ પુરઃ સુભગોપચારાઃ

હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૬॥

શ્રીપાદરેણુશુભકુઙ્કુમરાગયુક્તાન્
એલાનુશીરમૃગનાભિમદાક્ત ચૂર્ણાન્ ।
શ્રીયક્ષકર્દમયુતાન્તુ ગૃહાણ ગન્ધાન્
હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૭॥

ગુઞ્જાસુકઞ્જબકુલાદિ સુવર્ણમાલાન્
ગુઞ્જારવપ્રસવપુષ્પયુતાં ચ રમ્યાન્ ।
કુન્દારવિન્દમકરન્દમિલિન્દયુક્તાન્
હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૮॥

નીહારબિન્દુયુતમૌક્તિકકાન્તિભાસાન્
સેવન્તિકાકનકચમ્પકજાતિયુક્તાન્ ।
ભો સ્વીકુરુ પ્રણવતઃ શ્રવણપ્રવીર
હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૯॥

કૃષ્ણાગુરુપ્રચુરગુગ્ગુલધૂપધૂમાન્
કર્પૂરચન્દનસુગન્ધિતધૂમ્રવીચિન્ ।
દીપાંશ્ચ પશ્ય વિવિધાન્મણિહૈમપીઠાન્
હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૧૦॥

ભક્ત્યા સમર્પિતમહો નવનીતમગ્ર્યં
ક્ષીરં તથા ચ સસિત ધૃતકન્દયુક્તમ્ ।
નાનાફલાનિ રુચિરાણિ ચ હ્યર્પિતાનિ
હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૧૧॥

રમ્ભાફલાનિ શુચિગન્ધસમન્વિતાનિ
આરક્તસાન્ધ્યમધુવર્ણરસાન્વિતાનિ ।
આમ્રાદિ ખર્જુરયુતાન્યમૃતપ્રદાનિ
હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૧૨॥

વાતામ્બુહેમકદલીબદરીફલાનિ
સીતાફલાનિ રઘુનાથફલાન્વિતાનિ ।
ઔદુમ્બરાદિ મધુદાડિમબિલ્વકાનિ
હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૧૩॥

જામ્બીરજમ્બુપનસાદિ મહાફલાનિ
    દ્રાક્ષાયુતાનિ મધુખાણ્ડવપ્રેયકાનિ ।
શ્રીનારિકેલફલવારિ ચ સેવ્યતાં વૈ
    હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૧૪॥

મુક્તાઃ સરોજસદનાદ્ ભ્રમરાઃ પ્રભાતે
    ચિત્તં તુ બદ્ધમભવધ્યપિ ચેત્સુતૃપ્તમ્ ।
ત્વત્પાદપદ્મમધુભુગ્ મમ માનસોઽયં
    હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૧૫॥

નિદ્રાં નિહાય શુચિમઙ્ગલદર્શનં તે
    દત્ત્વા ચ સ્વીકુરુ ગુરો કૃપયા હિ સેવામ્ ।
ભક્તાઃ નમન્તિ લલિતસ્મિતરાગયુક્તાઃ
    હે શ્રીધર શ્રુતિશિરસ્તવ સુપ્રભાતમ્ ॥ ૧૬॥

ઇતિ શ્રી પૃથ્વીરાજ ભાલેરાવઃ અથવા સુવ્રતવિરચિતં
શ્રીધરસુપ્રભાતં સમ્પૂર્ણમ્ ।

Proofread by Paresh Panditrao

*Shridhara Suprabhatam*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*